# Brahmavishnvishakritam Surya Stotram 14

# ब्रह्मविष्ण्वीशकृतं सूर्यस्तोत्रम् १४

## Document Information

Text title : Brahmavishnvishakritam Surya Stotram 14

File name : brahmaviShNvIshakRRitaMsUryastotram14.itx

Category : navagraha, bhaviShyapurANa, stotra

Location : doc_z_misc_navagraha

Proofread by : PSA Easwaran

Description/comments : bhaviShyapurANa | brAhmaparva | adhyAya 123/44-52||

Latest update : October 7, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

October 7, 2024

*sanskritdocuments.org*

Brahmavishnvishakritam Surya Stotram 14

# ब्रह्मविष्णवीशकृतं सूर्यस्तोत्रम् १४

ब्रह्मविष्णवीशा ऊचुः ।
नमो नमः सुरवर तिग्मतेजसे नमो नमः सुरवर संस्तुताय वै ।
जडान्धमूकान्बधिरान्सकुष्ठान्सश्वित्रिणोऽधान्विविधव्रणावृतान् ।
करोषि तानेव पुनर्नवान्सदा अतो महाकारुणिकाय ते नमः ॥ ४४॥

यदौदरं ज्योतिरतित्वरन्महद्यदल्पतेजो यदपीह चक्षुषाम् ।
यदत्र यज्ञेष्वपनीतमाहितं तवैव तद्रूपमनेकतः स्थितम् ॥ ४५॥

सुरद्विषः सागरतोयवासिनः प्रचण्डपाशासिपरश्वधायुधाः ।
समुच्छ्रितास्ते भुवि पापचेतसः प्रयान्ति नाशं तव देव दर्शनात् ॥ ४६॥

यतो भवांस्तीर्थफलं समस्तं यज्ञेषु नित्यं भगवानवस्थितः ।
नमो भवन्नात्र विचारणास्ति सदा समः शान्तिकरो नराणाम् ।
यच्चापि लोके तप उच्यते बुधैस्तत्ते महातेज उशन्ति पण्डिताः ॥ ४७॥

स्तुतः स भगवानेवं प्रजापतिमुखैः सुरैः ।
अवधानं ततश्चक्रे श्रवणाभ्यां महीपते ॥ ४८॥

स्तुवन्ति ते ततो भूयः शिवविष्णुपुरोगमाः ।
कृत्वा मां पुरतः सर्वे भक्तिनम्राः समन्ततः ॥ ४९॥

नमो नमस्त्रिभुवनभूतिदायिने क्रतुक्रियासत्फलसम्प्रदायिने ।
नमो नमः प्रतिदिनकर्मसाक्षिणे सहस्रसन्दीधितये नमो नमः ॥ ५०॥

प्रसक्तसप्ताश्वयुजे क्षयाय ध्रुवैकरश्मिग्रथिने नमो नमः ।
सवालखिल्याप्सरकिन्नरोरगैः संसिद्धगन्धर्वपिशाचमानुषैः ।
सयक्षरक्षोगणगुह्यकोत्तमैः स्तुतः सदा देव नमो नमस्ते ॥ ५१॥

यतो रसान्सङ्क्षिपसे शरीरिणां गभस्तिभिर्हिमजलधर्मनिःस्रवैः ।
जगच्च संशोषयसे सदैव अतोऽसि लोके जगतो विशोषणम् ॥ ५२॥

इति भविष्यपुराणे ब्राह्मे पर्वणि त्रयोविंशाधिकशततमाध्यायान्तर्गतं
ब्रह्मविष्णुरुद्रादिकृतं सूर्यस्तोत्रं समाप्तम् ।

भविष्यपुराण । ब्राह्मपर्व । अध्याय १२३/४४-५२॥

bhaviShyapurANa . brAhmaparva . adhyAya 123/44-52..

Proofread by PSA Easwaran

*Brahmavishnvishakritam Surya Stotram 14*

pdf was typeset on October 7, 2024

Please send corrections to *sanskrit@cheerful.com*